अक्षीणकर्म्मबन्धस्तु ज्ञात्वा मृत्युमुपस्थितम् ।
उत्क्रान्तिकाले संस्मृत्य पुनर्योगित्वमृच्छति ॥
तस्मादसिद्धयोगेन सिद्धयोगेन वा पुनः ।
ज्ञेयान्यरिष्टानि सदा येनोत्क्रान्तौ न सीदति ॥”
इति श्रीमार्कण्डेयपुराणे ओँकारमाहात्म्यम् ॥ * ॥
“यन्न्यूनञ्चातिरिक्तञ्च यच्छिद्रं यदयज्ञियम् ।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत् ।
तदोङ्कारप्रयुक्तेन सर्व्वञ्चाविकलं भवेत् ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥
“ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥”
इति श्रीभगवद्गीतायाम् । ८ । १३ ॥

प्रणादः, पुं, ( प्रणदनमिति । प्र + णद + घञ् । ) अनुरागजशब्दः । इत्यमरः । १ । ६ । ११ ॥ “प्रीतिजनितो सुखकण्ठादिशब्दः । प्रीतिजं शीत्कृतम् । ‘अनुरागकृते शब्दे प्रणादः शीत्कृतं नृणाम् ।’ इति शब्दार्णवः ॥ गुणानुरक्तलोकप्रभवः शब्दः । इति मधुमाधवः । अनुरागजन्मा जनशब्दः । इति कलिङ्गः ।” इत्यमरटीकायां भरतः ॥ तारशब्दः । ( यथा, रामायणे । २ । ३८ । २ ।
“तेन तत्र प्रणादेन दुःखितः स महीपतिः ।
चिच्छेद जीविते श्रद्धां धर्म्मे यशसि चात्मनः ॥”)
श्रवणामयः । इति मेदिनी । दे, ३६ ॥ शेषस्य नामान्तरं कर्णनादः । यथा,—
“कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वरान् ।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते ॥”
इति माधवकरः ॥

प्रणामः, पुं, ( प्र + णम + भावे घञ् । ) प्रणतिः । प्रणिपातः । भक्तिश्रद्धातिशययुक्तनमस्कारः । स तु स्वापकर्षबोधकव्यापारविशेषः । इति मुग्धबोधटीकायां दुर्गादासः ॥ स चतुर्व्विधः । अभिवादनम् १ अष्टाङ्गः २ पञ्चाङ्गः ३ करशिरःसंयोगश्च ४ । प्रथमस्य लक्षणं तच्छब्दे द्रष्टव्यम् ॥ द्वितीयो यथा,—
“पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा ।
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः ॥”
तस्य फलम् ।
“भूमौ निपत्य यः कुर्य्यात् क्षणोऽष्टाङ्गनतिं सुधीः ।
सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात् ॥”
तृतीयो यथा,—
“बाहुभ्याञ्चैव जानुभ्यां शिरसा वचसा दृशा ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवराविमौ ॥” * ॥
प्रकर्षेण नमनम् । तद्विधिर्यथा, कालिकापुराणे ।
“शिरोमत्पादयोः कृत्वा बाहुभ्याञ्च परस्परम् ।
प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥”
किञ्चागमे ।
“दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा ।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥ * ॥
जानुभ्याञ्चैव बाहुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ ॥”
इति ॥ * ॥
“गरुडं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः ।
अवश्यञ्च प्रणामांस्त्रीन् शक्तश्चेदधिकाधिकान् ॥” * ॥
तथा च नारदपञ्चरात्रे ।
“सन्निं वीक्ष्य हरिं चाद्यं गुरून् स्वगुरुमेव च ।
द्विचतुर्व्विंशदथवा चतुर्व्विंशत्तदर्द्धकम् ॥
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वदा नमेत् ॥” * ॥
विष्णुधर्म्मोत्तरे ।
“देवार्च्चादर्शनादेव प्रणमेन्मधुसूदनम् ।
स्नानापेक्षा न कर्त्तव्या दृष्ट्वार्च्चां द्विजसत्तमाः ॥
देवार्च्चादृष्टिपूतं हि शुचि सर्व्वं प्रकीर्त्तितम् ॥” * ॥
अथ नमस्कारमाहात्म्यम् । नारसिंहे ।
“नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः ।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥”
स्कान्दे ।
“दण्डप्रणामं कुरुते विष्णवे भक्तिभावतः ।
रेणुसङ्ख्यां वसेत् स्वर्गे मन्वन्तरशतं नरः ॥”
तत्रैव ब्रह्मनारदसंवादे ।
“प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥”
तत्रैव श्रीशिवोमासंवादे ।
“भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि ।
प्रणमेद्यो हि देवेशं सोऽश्वमेधफलं लभेत् ॥”
तत्रैवान्यत्र ।
“तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम् ॥
शाठ्येनापि नमस्कारं कुर्व्वतः शार्ङ्गधन्वने ।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति ॥
रेणुमण्डितगात्रस्य कणा देहे भवन्ति ये ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥”
विष्णुधर्म्मोत्तरे ।
“अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत् ।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी ॥
जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात् ॥”
विष्णुपुराणे ।
“अनादिनिधनं देवं दैत्यदानवदारणम् ।
ये नमन्ति नरा नित्यं न हि पश्यन्ति ते यमम् ॥
ये जना जगतां नाथं नित्यं नारायणं द्विजाः ।
नमन्ति न हि ते विष्णोः स्थानादन्यत्र गामिनः ॥”
नारदीये ।
“एकोऽपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ॥”
हरिभक्तिसुधोदये ।
“विष्णोर्द्दण्डप्रणामार्थं भक्तेन पतता भुवि ।
पातितं पातकं कृत्स्नं नोत्तिष्ठति पुनः सह ॥”
स्कान्दे देवदूतविकुण्डलसंवादे ।
“तपस्तप्त्वा नरो घोरमरण्ये नियतेन्द्रियः ।
यत् फलं स समाप्नोति तन्नत्वा गरुड़ध्वजम् ॥
कृत्वापि बहुशः पापं नरो मोहसमन्वितः ।
न याति नरकं नत्वा सर्व्वपापहरं हरिम् ॥”
तत्रैव वेदनिधिस्तुतौ ।
“अपि पापं दुराचारं नरं त्वत्प्रणतं हरे ।
नेक्षन्ते किङ्करा याम्या उलूकास्तपनं यथा ॥”
विष्णुपुराणे श्रीयमस्य निजभटानुशासने ।
“हरिममरगणार्च्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्त्यः ।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम् ॥”
ब्रह्मवैवर्त्ते ।
“शरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः ।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ ॥”
अष्टमस्कन्धे च बलिवाक्ये ।
“अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः ।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽपसदेऽसुरेऽर्पितः ॥”
अतएव नारायणव्यूहस्तवे ।
“अहो भाग्यमहो भाग्यमहो भाग्यं नृणामिदम् ।
येषां हरिपदाब्जाग्रे शिरो न्यस्तं यथा तथा ॥”
किञ्च । नारसिंहे श्रीयमोक्तौ ।
“तस्य वै नारसिंहस्य विष्णोरमिततेजसः ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥”
भविष्योत्तरे च जलधेनुप्रसङ्गे ।
“विष्णोर्द्देवजगद्धातुर्जनार्द्दनजगत्पतेः ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥”
इत्यादि ॥ * ॥
अथ प्रणामनित्यता । बृहन्नारदीये लुब्धकोपाख्यानारम्भे ।
“सकृद्वा न नमेद्यस्तु विष्णवे शर्म्मकारिणे ।
शवोपमं विजानीयात् कदाचिदपि नालपेत् ॥”
किञ्च । पाद्मे वैशाखमाहात्म्ये यमब्राह्मणसंवादे ।
“पश्यन्तो भगवद्द्वारं नाम शक्रपरिच्छदम् ।
अकृत्वा तत्प्रणामादि यान्ति ते नरकौकसः ॥” * ॥
अथ नमस्कारे निषिद्धानि । विष्णुस्मृतौ ।
“जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत् ।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात् ॥”
वाराहे ।
“वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् ।
श्वित्री स जायते मूर्खः सप्तजन्मनि भामिनि ! ॥’
किञ्चान्यत्र ।
“अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
जपहोमनमस्कारान्न कुर्य्यात् केशवालये ॥”